# Aryatara Ashtottarashata Nama Stotram

# આર્યતારાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Aryatara Ashtottarashata Nama Stotram

File name : AryatArAShTottarashatanAmastotram.itx

Category : devii, devI, buddha, aShTottarashatanAma, stotra

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# આર્યતારાષ્ટોત્તરશતનામસ્તોત્રમ્

ॐ નમઃ શ્રી આર્યતારાયૈ ।
શ્રીમત્પોતલકે રમ્યે નાનાધાતુવિરાજિતે ।
નાનાદ્રુમલતાકીર્ણે નાનાપક્ષિનિકૂજિતે ॥ ૧॥

નાનાનિર્ઝરભાઙ્કારૈર્નાનામૃગસમાકુલે ।
નાનાકુસુમજાતીભિઃ સમન્તાદધિવાસિતે ॥ ૨॥

નાનાહૃદ્યફલોપેતષટ્પદોદ્ગીતનિઃસ્વનૈઃ ।
કિન્નરૈર્મધુરોદ્ગીતૈર્મત્તરવારણસઙ્કુલૈઃ ॥ ૩॥

સિદ્ધવિદ્યાધરગણૈર્ગન્ધર્વૈશ્ચ નિનાદિતે ।
મુનિભિર્વીતરાગૈશ્ચ સતતં સુનિષેવિતે ॥ ૪॥

બોધિસત્ત્વગણૈશ્ચાન્યૈર્દશભૂમીશ્વરૈરપિ ।
આર્યતારાદિભિર્દેવૈર્વિદ્યારાજ્ઞીસહસ્રકૈઃ ॥ ૫॥

ક્રોધરાજગણૈશ્ચાન્યૈર્હયગ્રીવાદિભિર્વૃતે ।
સર્વસત્ત્વહિતે યુક્તો ભગવાનવલોકિતઃ ॥ ૬॥

વ્યાજહાર તતઃ શ્રીમાન્ પદ્મગર્ભાસને સ્થિતઃ ।
મહતા તપસા યુક્તો મૈત્ર્યા ચ કૃપયાન્વિતઃ ॥ ૭॥

ધર્મં દિદેશ તસ્યાં ચ મહત્યાં દેવપર્ષદિ ।
તત્રાપવિદ્ધમાગમ્ય વજ્રપાણિર્મહાબલઃ ॥ ૮॥

પરયા કૃપયા યુક્તઃ પપ્રચ્છ ચાવલોકિતમ્ ।
તસ્કરોરગસિંહોગ્રગજવ્યાઘ્રાદિસઙ્કુલે ॥ ૯॥

સીદન્ત્યમી મુને સત્ત્વા મગ્નાઃ સંસારસાગરે ।
બદ્ધાઃ સાંસારિકૈઃ પાશૈ રાગદ્વેષતમોમયૈઃ ॥ ૧૦॥

મુચ્યન્તે યેન સત્ત્વાસ્તે તન્મે બ્રૂહિ મહામુને ।

એવમુક્તો જગન્નાથઃ સ શ્રીમાનવલોકિતઃ ॥ ૧૧॥

ઉવાચ મધુરાં વાણીં વજ્રપાણિં પ્રબોધિનીમ્ ।
શૃણુ ગુહ્યકરાજેન્દ્ર અમિતાભસ્ય તાયણીઃ(ણીમ્) ॥ ૧૨॥

પ્રણિધાનવશોત્પન્નાં મમાજ્ઞાં લોકમાતરમ્ ।
મહાકરુણયોપેતાં જગદુદ્ધરણોદ્ધૃતામ્ ॥ ૧૩॥

ઉદિતાદિત્યસઙ્કાશાં પુર્ણેન્દુવદનપ્રભામ્ ।
ભાષયન્તીમિમાં તારાં સદેવાસુરમાનુષાન્ ॥ ૧૪॥

કમ્પયન્તીં ચ ત્રીન્ લોકાન્ ત્રાસયન્તીં યક્ષરાક્ષસાન્ ।
નીલોત્પલકરાં દેવીં મા ભૈર્મા ભૈરિતિ બ્રુવન્ ॥ ૧૫॥

જગત્સંરક્ષણાર્થયાહમુત્પાદિતા જિનૈઃ ।
કાન્તારે શસ્ત્રસમ્પાતે નાનાભયસમાકુલે ॥ ૧૬॥

સ્મરણાદેવ નામાનિ સત્ત્વાન્ રક્ષામ્યહં સદા ।
તારયિષ્યામ્યહં સત્ત્વાન્ નાનાભયમહાર્ણવાત્ ॥ ૧૭॥

તેન તારેતિ માં લોકે ગાયન્તિ મુનિપુઙ્ગવાઃ ।
કૃતાઞ્જલિપુટો ભૂત્વા તતઃ સાદરસાધ્વસઃ ॥ ૧૮॥

જ્વલયત્યન્તરિક્ષે તામિદં વચનમબ્રવીત્ ।
નામાષ્ટશતકં બ્રૂહિ યત્પુરા કીર્તિતં જનૈઃ ॥ ૧૯॥

દશભૂમીશ્વરૈર્નાથૈર્બોધિસત્ત્વૈર્મહર્દ્ધિકૈઃ ।
સર્વપાપહરં પુણ્યં માઙ્ગલ્યં કીર્તિવર્દ્ધનમ્ ॥ ૨૦॥

ધનધાન્યકરં ચૈવ આરોગ્યં પુષ્ટિવર્ધનમ્ ।
આયુરારોગ્યજનકં સર્વસત્ત્વસુખાવહમ્ ॥ ૨૧॥

લક્ષ્મ્યાઃ શ્રિયઃ સ્થાપકં ચ સર્વસત્ત્વવિવર્દ્ધનમ્ ।
મૈત્રીમાલમ્બ્ય સત્ત્વાનાં તત્કીર્તય મહામુને ॥ ૨૨॥

એવમુક્તે જગન્નાથઃ પ્રહસન્નવલોકિતઃ ।
વ્યવલોક્ય દિશઃ સર્વા મૈત્રીસ્ફરણયા દૃશા ॥ ૨૩॥

દક્ષિણં કરમુદ્ધૃત્ય પુણ્યલક્ષણમણ્ડિતમ્ ।
તમુવાચ મહાપ્રાજ્ઞઃ સાધુ સાધુ મહાતપ ॥ ૨૪॥

નામાનિ શ‍ૃણુ મહાભાગ સર્વસત્ત્વૈકવત્સરે ।
યાનિ સઙ્કીર્ત્ય મનુજા સમ્પદા સ્યુર્ધનેશ્વરાઃ ॥ ૨૫॥

સર્વવ્યાધિવિનિર્મુક્તાઃ સર્વૈશ્વર્યગુણાન્વિતાઃ ।
અકાલમૃત્યુનિર્દગ્ધાશ્ચ્યુતા યાન્તિ સુખાવતીમ્ ॥ ૨૬॥

તાન્યહં સંપ્રવક્ષ્યામિ દેવસઙ્ઘાઃ શ‍ૃણુત મે ।
અનુમોદધ્વમેતદ્વા ભવિષ્યધ્વં સુનિર્વૃતાઃ ॥ ૨૭॥

ૐ લોચને સુલોચને તારે તારોદ્ભવે સર્વસત્ત્વાનુકમ્પિનિ સર્વસત્ત્વતારિણિ
સહસ્રભુજે સહસ્રનેત્રે । ૐ નમો ભગવતે અવલોકય અવલોકય માં
સર્વસત્ત્વાંશ્ચ હું હું ફટ્ ફટ્ સ્વાહા । ૐ શુદ્ધે વિશુદ્ધે સુગતાત્મજે
મૈત્રીહૃદયે નિર્મલે શ્યામે શ્યામરૂપિ મહાપ્રાજ્ઞે પ્રબલવરભૂષિતે ।
અપરાજિતા મહારૌદ્રી વિશ્વરૂપી મહાબલા । ૐ સુશ્રિયે ॥ ૨૮॥

ૐ કલ્યાણી મહાતેજા લોકધાત્રી મહાયશાઃ ।
સરસ્વતી વિશાલાક્ષી પ્રજ્ઞા શ્રીર્બુદ્ધિવર્ધિની ॥ ૨૯॥

ધૃતિદા પુષ્ટિદા સ્વાહા ૐકારા કામરૂપિણી ।
સર્વસત્ત્વહિતોદ્યુક્તા સઙ્ગ્રામોત્તારિણી જયા ॥ ૩૦॥

પ્રજ્ઞાપારમિતા દેવી આર્યતારા મનોરમા ।
દુન્દુભી શઙ્ખિની પૂર્ણા વિદ્યારાજ્ઞી પ્રિયમ્વદા ॥ ૩૧॥

ચન્દ્રાનના મહાગૌરી અજિતા પીતવાસસા ।
મહામાયા મહાશ્વેતા મહાબલપરાક્રમા ॥ ૩૨॥

મહારૌદ્રી મહાચણ્ડી દુષ્ટસત્ત્વનિષૂદિની ।
પ્રશાન્તા શાન્તરૂપા ચ વિજયા જ્વલનપ્રભા ॥ ૩૩॥

વિદ્યુન્માલી ધ્વજી ખડ્ગી ચક્રી ચાપોદ્યતાયુધા ।
જમ્ભનો સ્તમ્ભની કાલી કાલરાત્રિર્નિશાચરી ॥ ૩૪॥

રક્ષણી મોહની શાન્તા કાન્તારી દ્રાવણી શુભા ।
બ્રહ્માણી વેદમાતા ચ ગુહ્યા ચ ગુહ્યવાસિની ॥ ૩૫॥

માઙ્ગલ્યા શાઙ્કરી સૌમ્યા જાતવેદા મનોજવા ।
કપાલિની મહાવેગા સન્ધ્યા સત્યાઽપરાજિતા ॥ ૩૬॥

સાર્થવાહકૃપાદૃષ્ટિર્નષ્ટમાર્ગપ્રદર્શિની ।

વરદા શાસની શાસ્ત્રી સુરૂપાઽમૃતવિક્રમા ॥ ૩૭॥

શર્વરી યોગિની સિદ્ધા ચણ્ડારી(લી)અમૃતા ધ્રુવા ।
ધન્યા પુણ્યા મહાભાગા શુભગા પ્રિયદર્શના ॥ ૩૮॥

કૃતાન્તત્રાસિની ભીમા ઉગ્રા ઉગ્રમહાતપા ।
જગદ્ધિતે સદોદ્યુક્તા શરણ્યા ભક્તવત્સલા ॥ ૩૯॥

વાગીશ્વરી શિવા સૂક્ષ્મા નિત્યા સર્વક્રમાનુગા ।
સર્વાર્થસાધની ભદ્રા ગોપ્ત્રી ધાત્રી ધનપ્રદા ॥ ૪૦॥

અભયા ગૌતમી પુણ્યા શ્રીમલ્લોકેશ્વરાત્મજા ॥ ઇતિ ॥ ૭।(૧૦૮)
તારાનામગુણાનન્તા સર્વાશાપરિપૂરકા ॥ ૪૧॥

ૐ તારે કૃપાવરે શ્રીક્લેશશ્રવણીયે સ્વાહા ।
નામ્નામષ્ટોત્તરશતં હ્યેતદ્યત્કીર્તિતં મયા ।
રહસ્યભૂતં ગુહ્યં ચ દેવાનામપિ દુર્લભમ્ ॥ ૪૨॥

સૌભાગ્યભોગકરણં સર્વકિલ્વિષનાશનમ્ ।
સર્વવ્યાધિપ્રશમનં સર્વસત્ત્વસુખાવહમ્ ॥ ૪૩॥

ત્રિકાલં યઃ પઠેદ્ધીમાન્ શુચિસ્થાને સમાહિતઃ ।
સોઽચિરેણૈવ કાલેન રાજ્યશ્રિયમવાપ્નુયાત્ ॥ ૪૪॥

દુઃખી સ્યાત્તુ સુખી નિત્યં દરિદ્રો ધનવાન્ ભવેત્ ।
પુત્રો ભવેન્મહાપ્રાજ્ઞો મેધાવી ચ ન સંશયઃ ॥ ૪૫॥

બન્ધનાન્મુચ્યતે બદ્ધો વ્યવહારે જયોઅ ભવેત્ ।
શત્રવો મિત્રતાં યાન્તિ શ◌ૃઙ્ગિણઃ શુનકા અપિ ॥ ૪૬॥

સઙ્ગ્રામે સઙ્કટે દુર્ગે નાનાભયસમુચ્છ્રિતે ।
સ્મરણાદેવ નામાનિ સર્વાન્ભયાનપોહતિ ॥ ૪૭॥

નાકાલમૃત્યુર્ભવતિ પ્રાપ્નોતિ વિપુલાશયમ્ ।
માનુષ્યે સફલં જન્મ તસ્યૈકસ્ય મહાત્મનઃ ॥ ૪૮॥

યશ્ચેદં પ્રાતરુત્થાય માનવઃ કીર્તયિષ્યતિ ।
સ દીર્ઘકાલમાયુષ્માન્ શ્રિયં ચ લભતે નરઃ ॥ ૪૯॥

દેવા નાગાસ્તથા યક્ષા ગન્ધર્વા કઠપૂતનાઃ ।
પિશાચા રાક્ષસા ભૂતા માતરો રૌદ્રતેજસાઃ ॥ ૫૦॥

ડાકિન્યસ્તારકાઃ પ્રેતાઃ સ્કન્દોમાદ્યા મહાગ્રહાઃ ।
છાયાપસ્મારકાશ્ચૈવ ખેટકા ખાર્દકાદયઃ ॥ ૫૧॥

વેતાલાશ્ચિઞ્ચકા પ્રેષ્યા યે ચાન્યે દુષ્ટચેતસઃ ।
છાયામપિ ન લઙ્ઘન્તિ કિં પુનસ્તસ્ય વિગ્રહમ્ ॥ ૫૨॥

દુષ્ટસત્ત્વા ન બાધન્તે વ્યાધયો નાક્રમન્તિ ચ ।
સર્વૈશ્વર્યગુણૈર્યુક્તો વંશવૃદ્ધિશ્ચ જાયતે ॥ ૫૩॥

જાતિસ્મરો ભવેદ્ ધીમાન્ કુલીનઃ પ્રિયદર્શનઃ ।
પ્રીતિમાંશ્ચ મહાવાગ્મી સર્વશાસ્ત્રવિશારદઃ ॥ ૫૪॥

કલ્યાણમિત્રસંસેવી બોધિચિત્તવિભૂષિતઃ ।
સદાઽવિરહિતો બુદ્ધૈર્યત્ર યત્રોપપદ્યતે ॥ ૫૫॥

ઇતિ શ્રીઆર્યતારાભટ્ટારિકાયા નામાષ્ટોત્તરશતં બુદ્ધપરિભાષિતં પરિસમ્પૂર્ણમ્ ॥

---

*Aryatara Ashtottarashata Nama Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*